# jayAdityastotram or jayAdityAShTakam

# जयादित्यस्तोत्रम् अथवा जयादित्याष्टकम्

## Document Information

Text title : jayAdityastotramskandapurANa

File name : jayAdityastotramskandapurANa.itx

Category : navagraha, aShTaka

Location : doc_z_misc_navagraha

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Description/comments : Skandamahapurna Maheshvarakhanda Kaumarikakhanda Adhyaya 51, verses 65-90

Latest update : February 21, 2018

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 20, 2021

*sanskritdocuments.org*

# जयादित्यस्तोत्रम् अथवा जयादित्याष्टकम्

न त्वं कृतः केवलसंश्रुतश्च यजुष्येवं व्याहरत्यादिदेव! ।
चतुर्विधा भारती दूरदूरं धृष्टः स्तौमि स्वार्थकामः क्षमैतत् ॥ १॥

मार्तण्डसूर्यांशुरविस्तथेन्द्रो भानुर्भगश्चाऽर्यमा स्वर्णरेताः ॥ २॥

दिवाकरो मित्रविष्णुश्च देव! ख्यातस्त्वं वै द्वादशात्मा नमस्ते ।
लोकत्रयं वै तव गर्भगेहं जलाधारः प्रोच्यसे खं समग्रम् ॥ ३॥

नक्षत्रमाला कुसुमाभिमाला तस्मै नमो व्योमलिङ्गाय तुभ्यम् ॥ ४॥

त्वं देवदेवस्त्वमनाथनाथस्त्वं प्राप्यपालः कृपणे कृपालुः ।
त्वं नेत्रनेत्रं जनबुद्धिबुद्धिराकाशकाशो जय जीवजीवः ॥ ५॥

दारिद्र्यदारिद्र्य निधे निधीनाममङ्गलामङ्गल शर्मशर्म ।
रोगप्ररोगः प्रथितः पृथिव्यां चिरं जयाऽऽदित्य! जयाऽऽप्रमेय! ॥ ६॥

व्याधिग्रस्तं कुष्ठरोगाभिभूतं भग्नघ्राणं शीर्णदेहं विसंज्ञम् ।
माता पिता बान्धवाः सन्त्यजन्ति सर्वैस्त्यक्तं पासि कोऽस्ति त्वदन्यः ॥ ७॥

त्वं मे पिता त्वं जननी त्वमेव त्वं मे गुरुर्बान्धवाश्च त्वमेव ।
त्वं मे धर्मस्त्वञ्च मे मोक्षमार्गो दासस्तुभ्यं त्यज वा रक्ष देव! ॥ ८॥

पापोऽस्मि मूढोऽस्मि महोग्रकर्मा रौद्रोऽस्मि नाऽऽचारनिधानमस्मि ।
तथापि तुभ्यं प्रणिपत्य पादयोर्जयं भक्तानामर्पयं श्रीजयार्क! ॥ ९॥

फलश्रुतिः

नारद उवाच-
एवं स्तुतो जयादित्यः कमठेन महात्मना ।
स्निग्धगम्भीरयावाचा प्राह तं प्रहसन्निव ॥ १०॥

जयादित्याष्टकमिदं यत्त्वया परिकीर्तितम् ।
अनेनस्तोष्यते यो माम्भुवि तस्य न दुर्लभम् ॥ ११॥

रविवारे विशेषेण मां समभ्यर्च्य यः पठेत् ।
तस्य रोगानशिष्यन्ति दारिद्र्यश्च न संशयः ॥ १२॥

त्वया च तोषितोवत्सतवदद्मिवरन्त्वमुम् ।
सर्वज्ञो भुवि भूत्वा त्वं ततो मुक्तिमवाप्स्यसि ॥ १३॥

त्वत्पिता स्मृतिकारश्च भविष्यति द्विजार्चितः ।
स्थानस्याऽस्य न नाशश्च कदाचित्प्रभविष्यति ॥ १४॥

न चैतत्स्थानकं वत्स परित्यक्ष्यामि कर्हिचित् ।
एवमुक्त्वा स भगवान्ब्राह्मणैरर्चितः स्तुतः ॥ १५॥

अनुज्ञाप्य द्विजेन्द्रांस्तांस्तत्रैवाऽन्तर्दधे प्रभुः ।
एवं पार्थ समुत्पन्नो जयादित्योऽत्र भूतले ॥ १६॥

आश्विने मासि सम्प्राप्ते रविवारे च सुव्रत!
आश्विने भानुवारेण यो जयादित्यमर्चयेत् ॥ १७॥

कोटितीर्थे नरः स्नात्वा ब्रह्महत्यां व्यपोहति ।
पूजनाद्रक्तमाल्यैश्च रक्तचन्दनकुङ्कुमैः ॥ १८॥

लेपनाद्गन्धधूपाद्यैर्नैवेद्यैर्घृतपायसैः ।
ब्रह्मघ्नश्च सुरापश्च स्तेयी च गुरुतल्पगः ॥ १९॥

मुच्यते सर्वपापेभ्यः सूर्यलोकञ्च गच्छति ।
पुत्रदारधनान्यायुः प्राप्य सांसारिकं सुखम् ॥ २०॥

इष्टकामैः समायुक्तः सूर्यलोके चिरं वसेत् ॥ २१॥

सर्वेषु रविवारेषु जयादित्यस्य दर्शनम् ।
कीर्तनं स्मरणं वापि सर्वरोगोपशान्तिकम् ॥ २२॥

अनादिनिधनं देवमव्यक्तं तेजसान्निधिम् ।
ये भक्तास्ते च लीयन्ते सौरस्थाने निरामये ॥ २३॥

सूर्योपरागे सम्प्राप्ते रविकूपे समाहितः ।
स्नानं यः कुरुते पार्थ होमं कुर्यात्प्रयत्नतः ॥ २४॥

दानं चैव यथाशक्त्या जयादित्याग्रतःस्थितः ।
तस्य पुण्यस्य माहात्म्यं श्रुणुष्वैकमनाजय ॥ २५॥

कुरुक्षेत्रेषु यत्पुण्यं प्रभासे पुष्करेषु च ।
वाराणस्याञ्च यत्पुण्यं प्रयागे नैमिषेऽपि वा ।
तत्पुण्यं लभते मर्त्यो जयादित्यप्रसादतः ॥ २६॥

इति श्रीस्कान्दे महापुराणे एकाशीतिसाहस्र्यां संहितायां
प्रथमे माहेश्वरखण्डे कौमारिकाखण्डे
जयादित्यमाहात्म्यवर्णननामैकपञ्चाशत्तमोऽध्याये
जयादित्याष्टकम् ॥ १॥

Skandamahapurna Maheshvarakhanda Kaumarikakhanda Adhyaya 51, verses 65-90

Encoded and proofread by Sunder Hattangadi

---

*jayAdityastotram or jayAdityAShTakam*
pdf was typeset on February 20, 2021

Please send corrections to *sanskrit@cheerful.com*